# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

## अध्याय २४

निवर्तमानः संहृष्टो रावणः स दुरात्मवान् ।
जह्रे पथि नरेन्द्रर्षिदेवगन्धर्वकन्यकाः ॥ १ ॥

दर्शनीयां हि यां रक्षः कन्यां स्त्रीं वाथ पश्यति ।
हत्वा बन्धुजनं तस्या विमाने संन्यवेशयत् ॥ २ ॥

तत्र पन्नगयक्षाणां मानुषाणां च रक्षसाम् ।
दैत्यानां दानवानां च कन्या जग्राह रावणः ॥ ३ ॥

दीर्घकेश्यः सुचार्वङ्ग्यः पूर्णचन्द्रनिभाननाः ।
शोकायत्तास्तरुण्यश्च समस्ता स्तननम्रिताः ॥ ४ ॥

तुल्यमग्न्यर्चिषां तत्र शोकाग्निभयसम्भवम् ।
प्रवेपमाना दुःखार्ता मुमुचुर्बाष्पजं जलम् ॥ ५ ॥

तासां निश्वसमानानां निश्वसैः सम्प्रदीपितम् ।
अग्निहोत्रमिवाभाति संनिरुद्धाग्निपुष्पकम् ॥ ६ ॥

का चिद्दध्यौ सुदुःखार्ता हन्यादपि हि माम् अयम् ।
स्मृत्वा मातॄह्पितॄन्भ्रातॄन्पुत्रान्वै श्वशुरानपि ।
दुःखशोकसमाविष्टो विलेपुः सहिताः स्त्रियः ॥ ७ ॥

कथं नु खलु मे पुत्रः करिष्यति मया विना ।
कथं माता कथं भ्राता निमग्नाः शोकसागरे ॥ ८ ॥

हा कथं नु करिष्यामि भर्तारं दैवतं विना ।
मृत्यो प्रसीद याचे त्वां नय मां यमसादनम् ॥ ९ ॥

किं नु मे दुष्कृतं कर्म कृतं देहान्तरे पुरा ।
ततोऽस्मि धर्षितानेन पतिता शोकसागरे ॥ १० ॥

न खल्विदानीं पश्यामि दुःखस्यान्तमिहात्मनः ।
अहो धिन्मानुषाँल्लोकान्नास्ति खल्वधमः परः ॥ ११ ॥

यद्दुर्बला बलवता बान्धवा रावणेन मे ।
उदितेनैव सूर्येण तारका इव नाशिताः ॥ १२ ॥

अहो सुबलवद्रक्षो वधोपायेषु रज्यते ।
अहो दुर्वृत्तमात्मानं स्वयमेव न बुध्यते ॥ १३ ॥

सर्वथा सदृशस्तावद्विक्रमोऽस्य दुरात्मनः ।
इदं त्वसदृशं कर्म परदाराभिमर्शनम् ॥ १४ ॥

यस्मादेष परख्यासु स्त्रीषु रज्यति दुर्मतिः ।
तस्माद्धि स्त्रीकृतेनैव वधं प्राप्स्यति वारणः ॥ १५ ॥

शप्तः स्त्रीभिः स तु तदा हततेजाः सुनिष्प्रभ ।
पतिव्रताभिः साध्वीभिः स्थिताभिः साधु वर्त्मनि ॥ १६ ॥

एवं विलपमानासु रावणो राक्षसाधिपः ।
प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १७ ॥

ततो राक्षसराजस्य स्वसा परमदुःखिता ।
पादयोः पतिता तस्य वक्तुमेवोपचक्रमे ॥ १८ ॥

ततः स्वसारमुत्थाप्य रावणः परिसान्त्वयन् ।
अब्रवीत्किमिदं भद्रे वक्तुमर्हसि मे द्रुतम् ॥ १९ ॥

सा बाष्पपरिरुद्धाक्षी राक्षसी वाक्यमब्रवीत् ।
हतास्मि विधवा राजंस्त्वया बलवता कृता ॥ २० ॥

एते विर्यात्त्वया राजन्दैत्या विनिहता रणे ।
कालकेया इति ख्याता महाबलपराक्रमाः ॥ २१ ॥

तत्र मे निहतो भर्ता गरीयाञ्जीवितादपि ।
स त्वया दयितस्तत्र भ्रात्रा शत्रुसमेन वै ॥ २२ ॥

या त्वयास्मि हता राजन्स्वयमेवेह बन्धुना ।
दुःखं वैधव्यशब्दं च दत्तं भोक्ष्याम्यहं त्वया ॥ २३ ॥

ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि ।
तं निहत्य रणे राजन्स्वयमेव न लज्जसे ॥ २४ ॥

एवमुक्तस्तया रक्षो भगिन्या क्रोशमानया ।
अब्रवीत्सान्त्वयित्वा तां सामपूर्वमिदं वचः ॥ २५ ॥

अलं वत्से विषादेन न भेतव्यं च सर्वशः ।

मानदानविशेषैस्त्वां तोषयिष्यामि नित्यशः ॥ २६ ॥

युद्धे प्रमत्तो व्याक्षिप्तो जयकाङ्क्षी क्षिपञ्शरान् ।
नावगच्छामि युद्धेषु स्वान्परान्वाप्यहं शुभे ।
तेनासौ निहतः सङ्ख्ये मया भर्ता तव स्वसः ॥ २७ ॥

अस्मिन्काले तु यत्प्राप्तं तत्करिष्यामि ते हितम् ।
भ्रातुरैश्वर्यसंस्थस्य खरस्य भव पार्श्वतः ॥ २८ ॥

चतुर्दशानां भ्राता ते सहस्राणां भविष्यति ।
प्रभुः प्रयाणे दाने च राक्षसानां महौजसाम् ॥ २९ ॥

तत्र मातृष्वसुः पुत्रो भ्राता तव खरः प्रभुः ।
भविष्यति सदा कुर्वन्यद्वक्ष्यसि वचः स्वयम् ॥ ३० ॥

शीघ्रं गच्छत्वयं शूरो दण्डकान्परिरक्षितुम् ।
दूषणोऽस्य बलाध्यक्षो भविष्यति महाबलः ॥ ३१ ॥

स हि शप्तो वनोद्देशे क्रुद्धेनोशनसा पुरा ।
राक्षसानामयं वासो भविष्यति न संशयः ॥ ३२ ॥

एवमुक्त्वा दशग्रीवः सैन्यं तस्यादिदेश ह ।
चतुर्दश सहस्राणि रक्षसां कामरूपिणाम् ॥ ३३ ॥

स तैः सर्वैः परिवृतो राक्षसैर्घोरदर्शनैः ।
खरः सम्प्रययौ शीघ्रं दण्डकानकुतोभयः ॥ ३४ ॥

स तत्र कारयामास राज्यं निहतकण्टकम् ।
सा च शूर्पणखा प्रीता न्यवसद्दण्डकावने ॥ ३५ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com